मथितां शर्करां जनयत्यतः। दुर्गन्धक्लिन्नमत्यर्थं नानावर्णं ततः सिराः। स्रवन्ति सहसा रक्तं तं विन्द्याच्छर्करार्बुदम्”। शर्करा वालुकातुल्या” भावप्र०।

**शर्करावत्** त्रि० शर्कराः सन्त्यस्मिन् मतुप् मस्य वः। बहुशर्करायुक्तदेशे।

**शर्करासप्तमी** स्त्री वैशाखशुक्लपक्षसप्तम्याम्। तद्विधानं मत्स्यपु० ७२अ० उक्तं यथा “शर्करासप्तमीं वक्ष्ये तद्वत् कल्मषनाशिनीम्। आयुरारोग्यमैश्वर्य्यं ययानन्तं प्रजायते। माधवस्य सिते पक्षे सप्तम्यां शुक्लपक्षतः। प्रातःस्नात्वा तिलैः शुक्लैः शुक्लमाल्यानुलेपनैः। स्थण्डिले पद्ममालिख्य कुङ्कुमेन सकर्णिकम्। तस्मै नमः सवित्रे तु गन्धपुष्पं निवेदयेत्” इत्यादि।

**शर्करोदक** न० शर्करामिश्रितमुदकम्। (चिनिर पाना) शर्करामिश्रिते जले तत्करणप्रकारगुणादिकं भावप्र० उक्तं यथा “जलेन शीतलेनैव घोलिता शुभ्रशर्करा। एलालवङ्गकर्पूरमरिचैश्च समन्विता। शर्करोदकनाम्नैतत् प्रसिद्धं विदुषां मतम्। शर्करोदकमाख्यातं शुक्रलं शिशिरं सरम्। बल्यं रुच्यं लघु स्वादु वातपित्तास्रनाशनम्। मूर्च्छाच्छर्दितृषादाहज्वरशान्तिकरं परम्” भावप्र०

**शर्करिक** त्रि० शर्कराः सन्त्यस्य ठन्। बहुशर्करायुक्तदेशे इलच्। शर्करिल-तत्रैव उभयत्रामरः।

**शर्द्ध** पु० शृध-घञ्। अपानवायूत्सर्गे। ल्युट्। तत्रैव न०।

**शर्द्धञ्जह** पु० शर्द्धमपानवायूत्सर्गं जहाति हा-खश् मुम् च। माषे। तद्भोजने हि अपानवायुर्निःसरतीति तस्य तथात्वम्।

**शर्ब** हिंसायां गतौ च भ्वा०पर०सक०सेट्। शर्बति अशर्बीत्।

**शर्मद** त्रि० शर्म ददाति दा-क। १सुखदायके २विष्णौ पु० विष्णुसं०।

**शर्मन्** शृ-मनिन्। १सुखे २तद्वति त्रि० ३ब्राह्मणोपाधौ पु०। “शर्मा देवश्च विप्रस्य वर्मा त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत्” यमः। “शर्मान्तं ब्राह्मणस्य स्यात् वर्मान्तं क्षत्रियस्य तु। धनान्तश्चैव वैश्यस्य दासान्तं चान्त्यजन्मनः” शातातपः।

**शर्मरा** स्त्री शर्म-राति रा-क। १दारुहरिद्रायां २वस्त्रभेदे पु० भरतः ३सुखदायके त्रि०।

शर्य्या स्त्री शॄ-यत्। रात्रौ वाचस्पतिः।

**शर्य्याति** पु० वैवस्वतमनोः पुत्रभेदे।

**शर्व** हिंसे भ्वा० पर० सक० सेट्। शर्वति अशर्वीत्।

**शर्व** पु० शर्व-अच्। १महादेवे हेमच०। २विष्णौ विष्णुसं०।

**शर्वर** पु० शर्व-अरन्। १कामदेवे २तमसि न० उणादि०। ३सन्ध्यायाञ्च संक्षिप्तसा० ४स्त्रियां मेदि०।

**शर्वरी** स्त्री शॄ-वनिप् ङीप् वनो र च। १रात्रौ अमरः। शर्वरीशश्चन्द्रः। २हरिद्रायां विश्वः। [हेमच०]

**शर्वला** स्त्री शर्व-घञ् शर्वं लाति ला-क। तोमरास्त्रे

**शर्वाणी** स्त्री शर्वस्य पत्नी ङीष् आनुक् च। भवान्यां हेमच०

**शल** चालने भ्वा० आत्म० सक० सेट्। शलते अशलिष्ट। अशलिढ्(ध्व)म् शेले [ज्वलादि० शलः शालः।

**शल** गतौ भ्वा० पर० सक० सेट्। शलति अशालीत्।

**शल** श्लाघायां चु० आत्म०सक०सेट्। शालयते अशीशलत।

**शल** वेगे भ्वा० पर० सक० सेट्। शलति अशालीत्।

**शल** न० शल-अच्। १शल्लकीलोम्नि (सजारुकाँटा) अमरः २भृङ्गिणि ३देशभेदे ४ब्रह्मणि च पु० मेदि० ५कुन्तास्त्रे त्रिका० ६उष्ट्रे पुंस्त्री० हेमच० स्त्रियां ङीष्।

**शलक** पु० शल-वुन्। (माकड़सा) कीटभेदे त्रिका०।

**शलङ्ग** पु० शल-अङ्गच्। १लोकपाले २लवणभेदे उणादि०।

**शलभ** पु० शल-अभच्। कीटभेदे पतङ्गे अमरः।

**शलल** न० स्त्री शल-कलच्। शल्लकीलोम्नि (सजारुकाँटा) अमरः। स्त्रीत्वे गौरा० ङीष्।

**शलाका** स्त्री शल-आकन्। १शल्ये २मदनवृक्षे (मयना) ३शारिकायां ४शल्लक्यां ५शरे मेदि० ६आलेख्यतूलिकायां हेमच०। ७अस्थ्नि च शब्दच०। सुश्रुतोक्ते शुकाद्युद्धारणार्थे यन्त्रभेदे यन्त्रशब्दे दृश्यम्।

**शलाकापरि** अव्य०अव्ययी०। शलाकासाधनक्रीड़ायां पराजये

**शलाकापुरुष** पु० हेमचन्द्रोक्ते बौद्धानां त्रिषष्टिदेवपुरुषभेदे

**शलाटु** त्रि० शल-आटु। १अपक्वफले अमरः। २मूलभेदे उणादि० ३बिल्वे च पु० राजनि०।

**शलालु** पु० शल-आलुच्। सुगन्धिद्रव्यभेदे सि०कौ०।

**शलालुक** त्रि० शलालुना क्रीतं ठन्। शलालुद्रव्येण क्रीते पदार्थे स्त्रियां ङीष्।

**शल्क** न० शल-क कस्य नेत्त्वम्। १खण्डे २वृक्षवल्कले अमरः। ३मत्स्यत्वचि च (आँश) कोषान्तरम्। [त्वचि च सि०कौ०

**शल्कल** न० शल-कलन् कस्य नेत्त्वम्। १मत्स्यवल्कले २वृक्ष-

**शल्कलिन्** पु० शल्कलमस्त्यस्य इनि। मत्स्ये शब्दर०।

**शल्किन्** पु० शल्कमस्त्यस्य इनि। मत्स्ये हेमच०।

**शल्पदा** स्त्री शल-अच् तादृशं पदं मूलं यस्याः। मेदायाओषधौ राजनि०।